स्वामिनी इत्युच्यते, न क्रीता पत्नी—इति सम्बन्धि शब्दोऽयं यजमानः-इति च स्वामी,क्रीतः। तस्मात् स्त्रीपुंसयोरेकम् एवञ्जातीयकं कर्म्म—इति।

“ननु श्रुतिसामर्थ्यात्-‘यः-कश्चित्, यया कयाचित् सह सम्भूय यजेत’-इति प्राप्ते इदम् उच्यते,-‘यस्त्वया कश्चित् धर्म्मः कयाचित् सह कर्त्तव्यः, सोऽनया सह—इति, तेन न श्रुतिविरोधः स्मृतेः—इति गम्यते। अथ यदुक्तं,—केवलस्य पुंसोऽधिकारः केवलायाश्च स्त्रियाः, ‘यजेत’—इत्येकवचनस्य विवक्षितत्वात्—इति, तत् परिहर्तव्यम्। इदं तावदयं प्रष्टव्यः—‘यजेत’—इत्येकवचने विवक्षिते, षोड़शभिर्ऋत्विग्भिः सहयागो भवति-इत्येवम् उच्यते, प्रतिकारकं क्रियाभेदः,याजमानानेव पदार्थान् परिक्रयादीन् कुर्वन् ‘यजते’ इत्युच्यते यजमानः, आध्वर्य्यवानेव कुर्वन् अध्वर्य्युर्यजति—इत्येवम् उच्यते,यथा सम्भरणमेव कुर्वती स्थाली पक्तिं करोति—इत्युच्यते, यस्य च कारकस्य य आत्मीयोव्यापारः, स एकवचने विवक्षिते एकेन कर्त्तव्यो भवति—इति। एवं चेत् यावान् व्यापारो यजमानस्य, स तावान् न सम्भूय कर्त्तव्यः, एकेनैको याजमानेऽपरेणापरः। द्वादशे वा शते एकेन षट्पञ्चाशत्, अपरेणापि षट्पञ्चाशत्—इति। इह तु पत्नीव्यापारः अन्य एव, न तत्र पत्नी प्रवर्त्तमाना यजमानस्य एकत्वं विहन्ति,यथा अध्वर्य्युराध्वर्य्यवेषु प्रवर्त्तमानः। अवश्यं च सह पत्न्या यष्टव्यं, सध्यगं हि इदं दम्पत्योर्धनं तत्र यागोऽवश्यं सह पत्न्या कर्त्तव्यः,इतरथा अन्यतरानिच्छयां त्याग एव न संवर्त्तेत,तथाहि द्वितीयया पत्न्या विना त्यागोनैवावकल्पते, यस्य द्वितीया पत्न्यस्ति, तत्र क्रत्वर्थान् एषा करिष्यति। कर्तृसंस्कारार्थेषु नैव दोषः, सम्भवन्ति हि तानि सर्वत्र—इति” भा०

“लिङ्गदर्शनाच्च” १८सू०।

“लिङ्गं खल्वपि दृश्यते,‘योक्त्रेण पत्नीं सन्नह्यति मेखलया यजमानं मिथुनत्वाय”—इति। यदि स्त्रीपुंसावेकत्र, योक्त्रस्य मेखलायाश्च विभागो वाक्यात् गम्यते, मिथुनसम्भवश्च, तदेतत् स्त्रीपुंससाधनके कर्म्मण्युपपद्यते, न अन्यथा” भा०

‘क्रीतत्वात्तु भक्त्या स्वामित्वमुच्यते’ १९सू०

“स्थितादुत्तरमुच्यते। तुशब्दः पक्षं व्यावर्त्तयति। नैतदस्ति, यदुक्तं स्ववती स्त्री—इति, क्रीता हि सा, दृष्टार्थत्वात् अभिरथशतदानस्य,अतो यदस्याः स्वामित्वम् उच्यते, तत् भक्त्या यथा पूर्णकोऽस्माकं वलीवर्द्दानाम् ईष्टे—इति, एवं पत्न्यपि पारिणाय्यस्य ईष्टे—इति” भा०

“फलार्थित्वात्तु स्वामित्वेनाभिसम्बन्धः” २०सू०

“नैतदस्ति, क्रयो मुख्यः, गौणं स्वामित्वम्-इति, फलार्थिनी हि सा, स्मृतेर्नादरिष्यते, स्मृत्यनुरोधात् अस्वा स्यात्, स्ववती श्रुत्यनुरोधात्” भा०

“फलवत्तां च दर्शयति” २१सू०

“सं पत्नी पत्या सुकृतेन गच्छतां यज्ञस्य धुर्यायुक्तावभूताम्, सञ्जानानौ विजहताम् अरातीर्दिवि ज्योतिरजरमारभेताम्”-इति दम्पत्योः फलं दर्शयति। तस्मात् अप्युभावधिकृतौ-इति सिद्धम्” शवरभाष्यम्।

“शूद्रानीतैः क्रयक्रीतैः कर्म कुर्वन् पतत्यधः” स्मृतिः।

क्रयनक्षत्राणि मु० चि० पी० धा० दर्शितानि यथा।

“क्रयर्क्षे विक्रयो नेष्टो विक्रयर्क्षे क्रयोऽपि न। पौष्णाम्बुपाश्विनीवातश्रवश्चित्राः क्रये शुभाः” मु०चि०।

“अथ क्रयविक्रयनक्षत्रेषु परस्परनिषेधं वदन्क्रयविक्रयनक्षत्राण्यनुष्टुभाह क्रयर्क्षे इति। क्रयनक्षत्रे विक्रयो न कार्यः, तथा विक्रयर्क्षे क्रयोऽपि न कार्यः, नन्विदमयुक्तं विक्रयोनाम मौल्यं गृहीत्वा वस्तुदानं क्रयोनाम मौल्यं दत्त्वा स्वग्रहणं यदा येन क्रयः कर्त्तव्यः तदान्येन विक्रयोऽपि कर्त्तव्यस्तत्र क्रयविक्रयनक्षत्राणां महाभेदादुभयविधमुहूर्त्तानुपपत्तिः उच्यते विक्रेता यदा मुहूर्त्तो विक्रयार्थं गृह्यते तदा क्रयिणोऽनुज्ञां लब्ध्वा यावदिष्टं वस्तु स्वगृहात्पृथक् क्रियते, तत्कर्म विक्रयशब्दवाच्यं यदा तु क्रयिणा क्रयमुहूर्त्तं प्राप्यते तदा विक्रेत्रे मूल्यद्रव्यं दत्त्वा पृथक् कृतविक्रेतृवस्तु गृह्यते तत्कर्मक्रयशब्दवाच्यमिति मत्वात्र समाधिः। अथवा क्रयिविक्रेत्रोरन्यतरस्य कदाचिन्मुहूर्त्तसम्भवेऽद्वयोर्वनावश्यकत्वे। आवश्यकत्वे तु मुहूर्त्तगवेषणायां कालविलम्बनिष्पत्तावन्येन तृतीयेन मुहूर्त्तविचारमनङ्गीकृत्य समवस्त्वाप्त्या वस्तुग्रहणसिद्धिसम्भवात् तदा विक्रेतुरेव मुहूर्त्तविचारः। एवं च क्रेतुरप्यवश्यविक्रेतव्यस्य वस्तुनो यदा गृहीता सम्भवेत्तदैव मुहूर्त्तमनालोच्य वस्तुदानमावश्यकम् मुहूर्त्तविचारतः कालविलम्बे तावद्द्रव्यप्राप्त्यनुपपत्तेः। तदा तु क्रयण एव मुहूर्त्तविचारः। नन्वेवमपि क्रयविक्रयनक्षत्राणां पार्थक्येनाभिधानात्तयोः परस्परगतनिषेधो न युज्यते यथा राजदर्शन विहितनक्षत्रेभ्योऽन्यनक्षत्रेषु राजदर्शनं निषिद्धमि·